**ईदृश** त्रि॰ अयमिव पश्यति इदम्+दृश–कर्मकर्त्तरि कञ् इशादेशः दीर्घः। एवंविधदर्शनवति। "ईदृशैस्सरतैर्जाने सत्यं दोषाकरो भवान्" चन्द्रा॰। "यच्चान्यत् किञ्चिदीदृशम्"। "न हीदृशमनायुष्यं लोके किञ्चन विद्यते" प्रेत्येह चेदृशा विप्रागर्ह्यन्ते ब्रह्मवादिभिः" मनुः। "तानोम्हडान ईदृशे" ऋ॰ १,१७,१। "ईदृशे एवं विधे" भा॰। स्त्रियां ङीप् "सर्व्वेषामीदृशी रसाभिव्यक्तिः" सा॰ द॰। मुग्धबोधकारस्तु अयमिव दृश्यते इति विग्रहं क्सादौ चकार तच्च "कर्त्तरि कृदिति" पा॰ अनुशासनविरोधादुपेक्ष्यम्।

**ईप्सा** स्त्री आप्तुमिच्छा आप–सन्–अ। १आप्तुमिच्छायाम् २इच्छायाञ्च। "ईप्सैषा पिशुनं शुद्धं ममत्वं परिपालनम्"। भा॰ आश्व॰ ३७अ॰।

**ईप्सित** त्रि॰ आप–सन् क्त। १आप्तुमिष्टे क्रियाफलेन व्याप्तुमिष्टे "कर्त्तुरीप्सिततमं कर्म्म" पा॰। "निर्वर्त्त्यञ्च विकार्य्यं च प्राप्यञ्चेति त्रिधा मतम्। तच्चेप्सिततमं कर्म्म चतुर्द्धान्यत्तु कल्पितम्" भर्त्तृ॰ "तमब्ग्रहणं किमीप्सितमात्रे मा भूत्" सि॰ कौ॰। २इच्छाविषये च।

**ईप्सु** त्रि॰ आप्तुमिच्छुः। आप+सन्–उ। आप्तुमिच्छौ। "मन्दः कवियशःप्रेप्सुरिति" रघुः पाठान्तरं "शौचेप्सुः सर्व्वदाचामेत्" मनुः। "धर्मेप्सवस्तु धर्म्मज्ञाः" मनुः। "सौरभ्यमीप्सुरिव ते मुखमारुतस्य" रघुः।

**ईम्** अव्य॰ इ–वा मुच्। १अथशब्दार्थे। "एमेनमद्दधन्नमृता" यजु॰ ३३,६०। "आ ईम् एतौ निपातौ अथार्थौ" वेददी॰ २इदमर्थे च। "चयत ईमर्य्यमो अप्रशस्तान्" ऋ॰ १,१६७,८। "इह ब्रवीतु य ईमङ्ग वेदस्य" ऋ॰ १,१६४,७। "सोमेभिरीं पृणता भोजमिन्द्रम्" ऋ॰ २,१४,१०। "ईमिमम्" इति भा॰।

**ईय** त्रि॰ इ–बा॰ क्यप्। व्याप्ते। "आयद्दा ईयचक्षसा" ऋ॰ ५,६७,६ "ईयचक्षसा व्याप्तदर्शनौ" भा॰।

**ईयिवस्** त्रि॰ इण्–क्वसु। "गतवति। क ईयिवान् सदम्" मुग्धबो॰ "प्रतीयुषा पूर्दृशे जनेन" भट्टिः। "उपेयुषो मोक्षपथं मनस्विनः" माघः। "उपेयिवानित्यादि" पा॰ सू॰ उपेत्युलक्षणात् अन्यत्रापि क्वसुः।

**ईर** गतौ प्रेरणे च चुरा॰ उभ॰ पक्षे भ्वा॰ पर॰ सक॰ सेट्। ईरयति ते-ईरति ऐरिरत्-त-ऐरीत्। ईरयाम्-ईराम् वा बभूव आस चकार। ईरयिता। ईरिता ईरयिष्यति-ईरिष्यति। ईरणम्। ईरितः इरयन्-इरन्। ईरः ईर्य्य-माणः। "आपः समुद्रमैरयन्" ऋ॰ ८,६,१३। "अंशोरूर्म्मिमीरय" ऋ॰ ९,७९,१४। "यदस्य शुष्ममैरयन्" ऋ॰ २,१७,२ "ऐरिरच्च महाक्रमम्" भट्टिः कथने च। "अथ वाचमीरयति" शत॰ ब्रा॰ "ब्रह्मा रथन्तरं साम ईरयति भवान्तिके भा॰ आनु॰ १४अ॰। विरोधवाक्यञ्च यथेर्य्यमाणम्" भा॰ व॰ १२२ अ॰। "दमयन्त्या यथेरितम्" भा॰ व॰ २७४२। "हितं न गृह्णन्ति सुहृद्भिरीरितम्" रामा॰ "इतीरिता पत्ररथेन तेन" इतीरयित्वा विरचय्य वाङ्मयम्" नैष॰।

उद् उत्क्षेपणे। "उदीरयामासुःसलीलमक्षान्" रघुः। उच्चारणे कथने च "यदशोकोऽयमुदीरिष्यति" रघुः। "उदीरयामासुरिवोन्मदानाम्" रघुः।

अभि+उद्+आभिमुख्येनोच्चारिते। "आस्तीकस्तिष्ठस्तिष्ठेति वाचस्तिस्रोऽभ्युदैरयन्" भा॰ आ॰ २१७१।

सम्+उद्+सम्यगुच्चारे समुत्तोलिते च। पांशवोऽपि कुरुक्षेत्रे वायुना समुदीरिताः" भा॰ व॰ ५०७०।

प्र+प्रेरणे। प्रेरयति। "समीरणः प्रेरयिता भवेति" कुमा॰। "अपः प्रेरय सागरस्य बुध्नात्" ऋ॰ १०,८९,४। "किमुद्दिश्य काश्यपेन मत्सकाशमृषयः प्रेरिताः स्युः" शकु॰ "यात्रायै प्रेरयामास तं शक्तेः प्रथमं शरत्" रघुः।

सम्+ सम्यक्प्रेरणे समुच्चारणे सम्यग्गतौ च "समीरणः। "समीरयाञ्चकाराथ राक्षसस्य कपिः शिलाम्" भट्टिः। "ताभिराभरणैः शब्दस्त्रासिताभिः समीरितः" भा॰ व॰ १२१८अ॰।

**ईर** अदा॰ आत्म॰ सक॰ सेट्। ईर्त्ते ईराते ईरते ऐरत ऐरिष्ट ईराम् बभूव आस–चक्रे ईरिष्यति "इष्मा मधुमन्त ईरते" ऋ॰ ५,६२,१४ "समुदीर्त्ते पयो गोः" ऋ॰ ९, ९१,२। "अस्मे राजास ईरताम्" ऋ॰ ४,८,७। वायुप्रच्युतादिवोदृष्टिरीर्त्ते" तैत्ति॰। अस्मात् निष्ठाया नेट्। "न हि राज्ञामुदीर्णानाम्" भा॰ आ॰ ५१२८ श्लो॰। "उदीर्णरागप्रतिरोधकम् मुहुः" माघः। अस्यैव पक्षे चुरादित्वं तेन न तस्य भ्वादित्वमित्येके।

**ईरण** न॰ ईर–भावे ल्युट्। १प्रेरणे २गतौ च। युच्। ईरणा तत्रैव स्त्री। नन्द्या॰ ल्यु। ३प्रेरके त्रि॰ "समीरणः प्रेरयिता भवेति" कुमा॰।

**ईरामा** स्त्री ईर्लक्ष्मीस्तया रम्यतेऽत्र रम–आधारे घञ् ईत॰। नदीभेदे। "ईरामाञ्च महानदीम्" भा॰ व॰ १८८अ॰।

**ईरिण** त्रि॰ ईर–इनन्। ऊषरभूमौ। मेदि॰ "ततस्तदीरिणं